শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

সরলকৱিৱিরাঘৱাচার্য ৱিরচিতা

# ॥ শ্রীদক্ষিণশেষাচলেশ শ্রীনিৱাস ভগৱৎপ্রপত্তিঃ ॥

## (শ্রীপ্রসন্নৱেঙ্কটেশ প্রপত্তিঃ)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীদক্ষিণশেষাচলেশ শ্রীনিৱাস ভগৱৎপ্রপত্তিঃ ॥

শ্রীনিৱাসহৃদযঙ্গমাং রমাং
    সন্নমদ্ভৱখিদাপহারিণীম্।
নিত্যফুল্লসরসীরুহাসনাং
    সুস্মিতাং শরণমাশ্রযেশ্রিযম্॥ 1 ॥

সর্ৱজ্ঞ শক্তিভিরুপেত সমস্তহেতো
    সর্ৱেশ সর্ৱগুণ সর্ৱ হরে দযালো।
লক্ষ্মীপতে প্রণতৱৎসল চক্রপাণে
    শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ 2 ॥

ৱজ্রধ্ৱজাঙ্কুশ সরোরুহশঙ্খ চক্রৈ -
    রেখামযৈঃ শুভকরৈঃ পরমৎৱচিহ্নৈঃ।
কান্তৈর্ৱিভূষিততলৌ তৱ দেৱদেৱ
    শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ 3 ॥

অত্যর্থ মার্দৱযুতৈঃ করপল্লৱৈঃ স্ৱৈঃ
    সংৱাহনে ৱিরচিতে কমলাধরাভ্যাম্।
তজ্জক্লমাসহনসূচকরক্তৱর্ণৌ
    শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ 4 ॥

ব্রহ্মেশদেৱপতযো নিযতাধিকারাঃ
    সদ্যস্তরন্তি ৱিপদো হি যযোঃ প্রণামাৎ।

স্থাস্নুং ভজন্তি চ সমীহিতসিদ্ধিমেতৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ **5**॥

যৎসংশ্রিতপ্রিয জনাৱন নিত্যসক্তো
দেৱ্যাশ্রিযা কনসি দক্ষিণশেষশৈলে।
তৌ নিত্যমুক্তজনভোগ্যতমাৱুদারৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ **6**॥

ভাৱৎকপূজনৱিধাৱুপযোগভাজাম্
উত্তুঙ্গসৌরভভৃতাং তুলসীদলানাম্।
স্বচ্ছন্দকেলিনিলযাৱিৱ ভাসমানৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ **7**॥

ত্রৈলোক্যৱিক্রমৱিধিপ্রসিতৌ তদাযৌ
ইন্দ্রং বলিং ত্রিভুৱনং চ কৃতার্থযন্তৌ।
সর্ৱেশিতুস্তৱ যশোঽপুষতাং ভৃশং তৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ **8**॥

রামাত্মনস্তৱ শিলা মিথিলাপ্রযাণে
স্পৃষ্টা যদীযরজসা কিল শাপমুক্তা।
জাতা হি গৌতমৱধূর্ৱত তৌ নিষেৱ্যৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ **9**॥

তৌ দণ্ডকাৱননিৱাসিতপোধনানাং
ক্ষেমানুযোগ পদপদ্মনিষেৱণার্থম্।
প্রত্যাশ্রমং রধুপতে গমনে সহাযৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে॥ **10**॥

হৈ বালকৃষ্ণ ভৱতো হননেপ্রসক্তং
দৈত্যং ৱিপোথ্য সহসা শকটং বলাঢ্যম্।

রক্ষাৱিধেস্তৱ দিশাস্বধিরূঢকীর্তী
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে ॥ **11** ॥

সৌলূখলস্য তৱ দামনি বদ্ধমূর্তেঃ
গন্ধর্ৱযুগ্মতরুতামপনেতুমিচ্ছোঃ।
হে বালকৃষ্ণ বতচঙ্ক্রমণে সখাযৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে ॥ **12** ॥

হে ৱাসুদেৱ যমুনাহ্রদৱাসিঘোর -
দুষ্কৃত্যকালিযফণাৱলিরঙ্গমধ্যে।
নিশ্শঙ্কনর্তনকৃতো ভৱতোঽনুকূলৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে ॥ **13** ॥

হে কৃষ্ণ পাণ্ডৱসখ ৎৱরযোত্তরাযা
গর্ভং প্রৱিশ্যভসিতৎৱদশাং নিরস্য।
সন্তানবীজমৱতো ভৱতঃ সহাযৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে ॥ **14** ॥

যৌ দ্রাৱিডস্য সুকৱেঃ শঠকোপসূরেঃ
জিহ্ৱাগ্রপীঠমধিগম্য হরে সুহৃদ্যাম্।
গাধামযীমপুষতাং ভৱতঃ স্তুতিং তৌ
শ্রীশ্রীনিৱাস চরণৌ শরণং প্রপদ্যে ॥ **15** ॥

সীতাভিরামমহনীয মহার্হণোৎক
শ্রীশ্রীনিৱাসভগৱচ্চরণপ্রপত্তিম্।
শ্রীরাঘৱোঽকৃত কৱিঃ পদৱিৎ স ইত্থং
গংভীরভাৱরুচিরৈস্সরলৈঃ স্বপদ্যৈঃ ॥ **16** ॥

॥ ইতি শ্রীদক্ষিণশেষাচলেশ শ্রীনিৱাস ভগৱৎপ্রপত্তিঃ সমাপ্তা ॥